## किमोऽत् । (१२/१९६०)

किमः सप्तम्यन्ताद् अत् प्रत्ययो भवति । त्रलोऽपवादः । [1]क्व भोक्ष्यसे । क्वाध्येष्यसे । त्रलमपि केचिदिच्छन्ति – कुत्र[2] । तत्कथम् ? उत्तर[3]सूत्राद् वावचनं पुरस्ताद[4]पकृष्यते ॥

## वा ह च च्छन्दसि । (१३/१९६१)

किमः सप्तम्यन्ताद् वा हः प्रत्ययो भवति छन्दसि विषये । [5]यथाप्राप्तं [6]च । क्व । [7]'कुह' (ऋ. ८.७३.४) । कुत्रचिदस्य सा दूरे क्व ब्राह्मणस्य चावकाः ॥

## इतराभ्योऽपि दृश्यन्ते । (१४/१९६३)

सप्तमीपञ्चम्यपेक्षमितरत्वम् । इतराभ्यो विभक्तिभ्यस्तसिलादयो [8]दृश्यन्ते । दृशिग्रहणं प्रायिकविध्यर्थं, तेन [9]भवदादिभिर्योग एवैतद्विधानम् । के पुनर्भवदादयः ? भवान् दीर्घायुरायुष्मान् देवानां प्रियः इति । स भवान्, ततो भवान्, तत्र भवान् । तं भवन्तम्, तत्र भवन्तम्, ततो भवन्तम् । तेन भवता, तत्र भवता, ततो भवता । तस्मै भवते, तत्र भवते, ततो भवते । तस्माद्भवतः, तत्र भवतः, ततो भवतः । तस्मिन्भवति, तत्र भवति, ततो भवति । एवं [10]दीर्घायुःप्रभृतिष्वप्युदाहार्यम् ॥

## सर्वैकान्यकिंयत्तदः काले दा । (१५/१९६४)

सप्तम्याः इति [11]वर्तते, न तु इतराभ्यः इति । सर्वादिभ्यः [12]प्रातिपदिकेभ्यो दा प्रत्ययो भवति । [13]त्रलोऽपवादः । सर्वस्मिन् काले [14]सर्वदा । एकदा । अन्यदा । कदा । [15]यदा । तदा । काले इति किम् ? [16]सर्वत्र देशे ॥

## इदमो र्हिल् । (१६/१९६५)

सप्तम्याः इत्येव,[17] काले इति च । इदमः सप्तम्यन्तात् काले वर्तमानात् र्हिल् प्रत्ययो भवति । हस्यापवादः । लकारः स्वरार्थः । अस्मिन् काले एतर्हि[18] । काले इत्येव, इह देशे[19] ॥

## अधुना । (१७/१९६६)

अधुना इति निपात्यते । [20]इदमोऽश्भावो धुना च प्रत्ययः । अस्मिन् काले अधुना ॥

---

1. क्व गमिष्यसि क्व भक्षयिष्यसि इत्यधिकम् क. 2. इति इत्यधिकम् क. 3. सूत्रे क. 4. अव-
कृष्यते क, अनु कृष्यते ह. 5. चकारात् इत्यधिकम् ब. 6. अत् इत्यधिकम् ड. 7. कुशादित्यस्य ब्राह्मणस्य
क्वचिद् वचः इत्यधिकम् क, कुहस्थः कुह जग्मथुः । कुह विद्यस्य सुनृतेः । कुत्रादित्यस्य दूरे क्वास्मिन् ब्राह्मणस्य ब. ड,
कुत्रहाहरश्च । कुत्रास्य सूनृतेः क्वचित् दूरेऽस्मिन् ब्राह्मणस्य वचः ह. 8. प्रत्ययाः गृह्यन्ते फ.ह. 9. भवदाभिः
प्रयोगे फ. 10. दीर्घायुरपि ह. 11. अनुवर्तते ग. 12. सप्तम्यन्तेभ्यः इत्यधिकम् क. फ, सप्तम्यर्थेभ्यः काले
वर्तमानेभ्यः इत्यधिकम् ड.ग.ह. 13. त्रलादेरपवादः ह. 14. सदा ड. 15. यदि ड. 16. सर्वस्मिम् देशं
ड. 17. अनुवर्तते इत्यधिकम् क. 18. काले इत्यधिकम् क. 19. सूत्रस्यास्य वृत्तिर्न विद्यते ह. 20. इदमोऽन्ते
धुना च प्रत्ययः ह.